श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ शततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ शततमः सर्गः ॥

## केकयदेशादुपायनमादाय गार्ग्यस्य गमनं तत्प्रत्तं सन्देशमनुसृत्य श्रीरामस्यादेशेन कुमारद्वयसहितस्य भरतस्य गन्धर्वदेशोपर्याक्रमणं कर्तुं प्रस्थानं च

कस्यचित् त्वथ कालस्य युधाजित् केकयो नृपः।
स्वगुरुं प्रेषयामास राघवाय महात्मने ॥ **7.100.1** ॥

गार्ग्यमङ्गिरसः पुत्रं ब्रह्मर्षिममितप्रभम्।
दश चाश्वसहस्राणि प्रीतिदानमनुत्तमम् ॥ **7.100.2** ॥

कम्बलानि च रत्नानि चित्रवस्त्रमथोत्तमम्।
रामाय प्रददौ राजा शुभान्याभरणानि च ॥ **7.100.3** ॥

श्रुत्वा तु राघवो धीमान् महर्षिं गार्ग्यमागतम्।
मातुलस्याश्वपतिनः प्रहितं तन्महाधनम् ॥ **7.100.4** ॥

प्रत्युद्गम्य च काकुत्स्थः क्रोशमात्रं सहानुजः।
गार्ग्यं सम्पूजयामास यथा शक्रो बृहस्पतिम् ॥ **7.100.5** ॥

तथा सम्पूज्य तमृषिं तद् धनं प्रतिगृह्य च।
पृष्ट्वा प्रतिपदं सर्वं कुशलं मातुलस्य च ॥ **7.100.6** ॥

उपविष्टं महाभागं रामः प्रष्टुं प्रचक्रमे।
किमाह मातुलो वाक्यं यदर्थं भगवानिह॥ **7.100.7** ॥

प्राप्तो वाक्यविदां श्रेष्ठः साक्षादिव बृहस्पतिः।
रामस्य भाषितं श्रुत्वा महर्षिः कार्यविस्तरम्॥ **7.100.8** ॥

वक्तुमद्भुतसङ्काशं राघवायोपचक्रमे।
मातुलस्ते महाबाहो वाक्यमाह नरर्षभः॥ **7.100.9** ॥

युधाजित् प्रीतिसंयुक्तं श्रूयतां यदि रोचते।
अयं गन्धर्वविषयः फलमूलोपशोभितः॥ **7.100.10** ॥

सिन्धोरुभयतः पार्श्वे देशः परमशोभनः।
तं च रक्षन्ति गन्धर्वाः सायुधा युद्धकोविदाः॥ **7.100.11** ॥

शैलूषस्य सुता वीर तिस्रः कोट्यो महाबलाः।
तान् विनिर्जित्य काकुत्स्थ गन्धर्वनगरं शुभम्॥ **7.100.12** ॥

निवेशय महाबाहो स्वे पुरे सुसमाहिते।
अन्यस्य न गतिस्तत्र देशः परमशोभनः।
रोचतां ते महाबाहो नाहं त्वामहितं वदे॥ **7.100.13** ॥

तच्छ्रुत्वा राघवः प्रीतो महर्षेर्मातुलस्य च।
उवाच बाढमित्येव भरतं चान्ववैक्षत॥ **7.100.14** ॥

सोऽब्रवीद् राघवः प्रीतः साञ्जलिप्रग्रहो द्विजम्।
इमौ कुमारौ तं देशं ब्रह्मर्षे विचरिष्यतः॥ **7.100.15** ॥

भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च।
मातुलेन सुगुप्तौ तु धर्मेण सुसमाहितौ॥ **7.100.16** ॥

भरतं चाग्रतः कृत्वा कुमारौ सबलानुगौ।
निहत्य गन्धर्वसुतान् द्वे पुरे विभजिष्यतः॥ **7.100.17** ॥

निवेश्य ते पुरवरे आत्मजौ सन्निवेश्य च।
आगमिष्यति मे भूयः सकाशमतिधार्मिकः॥ **7.100.18** ॥

ब्रह्मर्षिमेवमुक्त्वा तु भरतं सबलानुगम्।
आज्ञापयामास तदा कुमारौ चाभ्यषेचयत्॥ **7.100.19** ॥

नक्षत्रेण च सौम्येन पुरस्कृत्याङ्गिरःसुतम्।
भरतः सह सैन्येन कुमाराभ्यां विनिर्ययौ॥ **7.100.20** ॥

सा सेना शक्रयुक्तेव नगरान्निर्ययावथ।
राघवानुगता दूरं दुराधर्षा सुरैरपि॥ **7.100.21** ॥

मांसाशिनश्च ये सत्त्वा रक्षांसि सुमहान्ति च।
अनुजग्मुर्हि भरतं रुधिरस्य पिपासया॥ **7.100.22** ॥

भूतग्रामाश्च बहवो मांसभक्षाः सुदारुणाः।
गन्धर्वपुत्रमांसानि भोक्तुकामाः सहस्रशः॥ **7.100.23** ॥

सिंहव्याघ्रवराहाणां खेचराणां च पक्षिणाम्।
बहूनि वै सहस्राणि सेनाया ययुरग्रतः॥ **7.100.24** ॥

अध्यर्धमासमुषिता पथि सेना निरामया।
हृष्टपुष्टजनाकीर्णा केकयं समुपागमत्॥ **7.100.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे शततमः सर्गः॥